दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-197 | 1 | मई 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णाष्टमी
बैशाख 27 प्रविष्टांशः मङ्गलमयः भवेत्

2 HPBOSE 10th Result- १० मई दिनाङ्के १० कक्षायाः परीक्षापरिणामः घोषितः भविष्यति
3 'मातृःमहिमा(दिवसविशेषः) डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी, भागलपुर, बिहार
4 संस्कृतभाषायाः संरक्षणाय आधुनिकतन्त्रेण सह संयोजनम् आवश्यकम् - डॉ. आनन्ददीक्षितः

## सुभाषितम्

**वने रणे शत्रुजलाग्निमध्ये,
महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा,
रक्षन्ति पुण्यानि पुराकृतानि।।**

भावार्थः- बहुत पहले (या पूर्वजन्म में भी) यदि किसी व्यक्ति ने धार्मिक आचरण द्वारा पुण्य अर्जित किए हों तो वे पुण्य सदैव उसकी रक्षा गहन वन में, युद्ध में, शत्रुओं से, जल व अग्नि से, समुद्र के मध्य में, पर्वतों की चोटियों में, निद्रित अवस्था में तथा अन्य विपरीत परिस्थितियों में करते हैं।

# शुभेंदु-अधिकारी पश्चिम बङ्गालस्य प्रथमः भाजपा-मुख्यमन्त्री सञ्जातः तेन सह पञ्चान्यैः मन्त्रिभिः अपि पद-गोपनीयतायाः शपथं गृहीतम्





शुभेन्दुः अधिकारी पश्चिमबंगालस्य नूतनमुख्यमन्त्रित्वेन शपथं गृहीतवान्। इत्थं पश्चिमबङ्गालराज्ये प्रथमं तावत् भाजपादलस्य प्रशासनं सङ्घटितं जातम्। अवधेयं यत् भाजपादलं विधानसभा निर्वाचनेषु ऐतिहासिकं जयं समय तृणमूल कांग्रेसदलस्य पंचदश-वर्षात्मकस्य शासनस्य अन्तं कृतवत्। कोलकातानगरस्य ब्रिगेड परेड ग्राउंड इति स्थले राज्यपालः आर एन रविः श्री शुभेंदुअधिकारिणं पदगोपनीयतायै प्रतिश्रावितवान्। तेन सह पञ्चान्यैः मन्त्रिभिः अपि पद-गोपनीयतायाः शपथं गृहीतम्।

## राष्ट्रिय-विधिक-सेवा-प्राधिकरणेन अशेषे हि देशे विवादानां सौहार्दपूर्णरीत्या निस्तारणार्थं राष्ट्रिय-लोक-न्यायालयस्य आयोजनं विहितम्

राष्ट्रिय-विधिकसेवा-प्राधिकरणम् सम्पूर्णदेशे ऐषमः द्वितीय-राष्ट्रिय-लोक-न्यायालयस्य आयोजनं विदधाति। प्राधिकरणस्य सदस्य-सचिवः संजीव पाण्डेयः आकाशवाणीम् ज्ञापयत् यत् लोक-न्यायालये सहमतेः योग्येषु आपराधिक प्रकरणेषु वादश्रवणं विधीयते। अस्य आयोजनस्य उद्देश्यं न्यायालयेषु लम्बित-प्रकरणानां सहमत्यानुसारं निस्तारणं वर्तते। श्री पाण्डेयः अवोचत् यत् त्रयोविंशत्यधिक-द्विसहस्रतमाब्दात् पञ्चविंशत्यधिक-द्विसहस्रतमाब्दं यावत् द्वादश-राष्ट्रिय-लोक-न्यायालयानाम् आयोजनं विधाय षडविंशतिः कोटि-प्रकरणानां समाधानम् अभवत्।

## तमिलनाडु-राज्ये सी. जोसेफ विजयस्य टी.वी. के. इति दलेन प्रमाणितं यत्, नूतन-सर्वकार-रचनायै तेषां पार्श्वे विंशत्युत्तर-शतं विधायाकानां समर्थनं वर्तते



तमिलनाडु-राज्ये नूतन सर्वकार-रचनायै TVK-दलेन प्रमाणितं यत् तेषां पार्श्वे विंशत्युत्तर-शतं विधायाकानां समर्थनं वर्तते । चतुस्त्रिंशदधिक-द्विशतं सदस्यानां विधानसभायां बहुमताय अष्टादशोत्तर-शतं विधायाकाः आवश्यकाः आसन् । चेन्नई-नगरे वार्ताहरैः सह भाषमाणः टीवीके-दलस्य नेता अधव-अर्जुनः अवदत् यत्, VCK तथैव इण्डियन-यूनियन-मुस्लिम लीग (IUML) इत्युभाभ्यां दलाभ्यां तस्मै पक्षाश्रयं विना समर्थनं प्रदत्तम्।अधुना निर्वाचने अष्टाधिकैकशतं आसनानि जित्वा टीवीके सर्ववृहत्तम-दलत्वेन उद्भूतम्। यद्यपि दलनेता सी. जोसेफ विजयः द्वयोः क्षेत्रयोः विजयी जातः, अतः तेन एकं स्थानं परित्यक्तं भविष्यति, येन दलस्य संख्या सप्तधिकैकशतं भविष्यति। तथापि काङ्ग्रेस-दलस्य पञ्च विधायाकाः, सीपीआई, 'सीपीआई-एम, वीसीके तथा आईयूएमएल इत्येतेषां प्रत्येकं द्वौ द्वौ विधायाकौ च मिलित्वा सहायक दलानां कुल संख्या त्रयोदश वर्तते, येन बहुमतस्य मार्गः प्रशस्तः जातः ।




## विदेशमन्त्री डॉ. एस. जयशङ्करः द्विपक्षीय सहयोगं सुदृढीकर्तुं त्रिनिदाद-एण्ड-टोबैगो देशस्य प्रधानमन्त्रिणा सह मेलनं साधितवान्



विदेशमंत्री सुब्रह्मण्यम जयशंकरः भारत-त्रिनिदाद टोबैगो देशानां मिथः पारम्परिक सम्बन्धानां प्रशंसाम् अकरोत्। त्रिनिदाद टोबैगो इत्यस्य विदेश तथा कैरिकॉमप्रकरणानां मंत्रालयस्य समारोहे डॉ. जयशंकरेण द्वयोः देशयोः प्रगाढ-सांस्कृतिक-सम्बन्धानाम् अथ ऐतिहासिकतायाः उल्लेखं कृतम्। भारतस्य त्रिनिदाद टोबैगो अमुना सह परंपरागतरूपेण मैत्रीपूर्णाः सम्बन्धाः वर्तन्ते। उभयोः देशयोः जनाः वेशभूषां क्रीडाम् आहारव्यवहारं च समेत्य परम्पराः यावत् नैकेषु विषयेषु साम्यं सन्धदते। डॉ. जयशंकरेण प्रधानमंत्रिणा कमला प्रसाद-बिसेसरवर्येण सह मेलनं विधाय द्विपक्षीय-सहयोगं इतोऽपि सुदृढीकर्तुं चर्चा कृता। यात्रावधौ पर्यटनं विदेश-कैरिकॉम मंत्रालय-भवनस्य सौरोर्जा संचालनं विविध-परियोजनाः अथ च आयुर्वेदकेन्द्रस्य स्थापनां समेत्य नैकेषु विषयेषु सहमतिः जाता।

## प्रधानमंत्री नरेन्द्रमोदी अद्य कर्नाटकस्य बेंगलुरुनगरे आर्ट ऑफ लिविंग इत्येतस्य समारोहे सहभागितां करिष्यति



हिमसंस्कृतवार्ता। प्रधानमंत्री नरेन्द्रमोदी अद्य कर्नाटकस्य बेंगलुरुनगरे आर्ट ऑफ लिविंग इत्येतस्य संस्थानस्य पञ्चचत्त्वारिंशत्तमीं वर्षपूर्तिम् उपलक्ष्य आयोजयिष्यमाणे समारोहे सहभागितां करिष्यति। श्रीमोदी आर्ट ऑफ लिविंग इंटरनेशनल सेंटर इत्यत्र नवनिर्मितं ध्यानमंदिरम् अपि उद्घाटितवान्। ततः परं प्रधानमंत्री मोदी हैदराबादनगरे प्रायः सार्धनव-सहस्र-कोटितोऽप्यधिक रूप्यकाणां अनेकासां विकास-परियोजनानां शिलान्यासं, लोकार्पणं च करिष्यति। प्रधानमन्त्री मोदी तत्र हैदराबाद-पणजी-आर्थिक-वीथिकायां राष्ट्रीयराजमार्गस्य चतुःभागपरस्य निर्माणस्य आधारशिलां अपि स्थापयिष्यति। तत्रैव प्रधानमंत्री वारंगलस्थले पीएम मित्रा पार्क इत्येतस्य उद्यानस्य उद्घाटनं करिष्यति। सममेव श्री मोदी हैदराबाद् अत्याधुनिकं कर्करोगपरं चिकित्सालयम् अपि लोकार्पयेत्।

# HPBOSE 10th Result- १० मई दिनाङ्के १० कक्ष्यायाः परीक्षापरिणामः घोषितः भविष्यति




हिमसंस्कृतवार्ताः- धर्मशाला।हिमाचलप्रदेशस्य १०-कक्ष्यायाः सहस्रशः छात्राणां प्रतीक्षा अधुना समाप्ता। प्रदेश- विद्यालयीय- शिक्षामण्डलं १० मई दिनाङ्के १०-कक्ष्यायाः वार्षिक- परीक्षापरिणामं घोषयिष्यति। विद्यालयीय- शिक्षा- मण्डल- धर्मशालायाः सचिवेन डॉ. मेजर विशालशर्मणा शनिवासरे एषा सूचना दत्ता। तेन उक्तं यत् १० कक्ष्यायाः परिणामः रविवासरे प्रातः ११:०० वादने घोषितः भविष्यति। छात्राः 'अमर उजाला' इति पत्रे प्रथमं विना काठिन्यं स्वकीयं परिणामं द्रष्टुं शक्नुवन्ति।

## ९३,५६४ छात्राः परीक्षां दत्तवन्तः-

अस्मिन् वर्षे विद्यालयीय-शिक्षा-मण्डलस्य १० कक्ष्यायाः परीक्षायां ९३,५६४ छात्राः उपस्थिताः आसन्। सर्वे छात्राः सोत्साहं परिणामस्य प्रतीक्षां कुर्वन्ति। १० कक्ष्यायाः परीक्षाः ३ तः २९ मार्च पर्यन्तं तथा १२ कक्ष्यायाः परीक्षाः ३ मार्च तः १ अप्रैल पर्यन्तं आयोजिताः आसन्। परीक्षायाः आयोजनं ३८४ केन्द्रेषु अभवत्। ५ अप्रैल दिनाङ्कतः उत्तरपुस्तिकानां मूल्याङ्कन-कार्यं प्रारब्धम् आसीत्।

## ४१ केन्द्रेषु अभवत् मूल्याङ्कन-कार्यम्

शिक्षामण्डलेन अस्मिन् वारे मूल्याङ्कन-कार्यार्थं प्रदेशे प्रायः ४१ केन्द्राणि स्थापितानि आसन्, यत्र १० तथा १२-कक्ष्यायाः उत्तरपुस्तिकानां परीक्षणं कृतम्। अस्मिन् कार्ये प्रायः ५,००० शिक्षकाणां नियोजनं कृतम् आसीत्।

## आधार-पत्रेण सह सम्बद्धं भविष्यति १०-१२ कक्ष्यायाः प्रमाणपत्रम्

प्रदेश-विद्यालयीय-शिक्षा-मण्डलं १० तथा १२ कक्ष्यायाः प्रमाणपत्राणि आधार-पत्रेण (Aadhaar Card) सह संलग्नीकरिष्यति। प्रमाणपत्राणां आधारपत्रेण सह सम्बद्धात् परम् अनुप्रतिकृति (डुप्लीकेट) प्रमाणपत्र-प्राप्तौ सुगमता भविष्यति, तथा च कूट-प्रमाणपत्राणां सम्भावना न्यूना भविष्यति। सूचनानुसारं शिक्षा-मण्डलं शीघ्रमेव प्रमाणपत्र-संलग्नतायाः एषा नूतना व्यवस्था आरप्स्यते। अस्याः पदस्य उद्देश्यं प्रमाणपत्राणां सुरक्षावर्धनम्, अनुप्रतिकृति- प्रमाणपत्रप्राप्तेः प्रक्रियां सरलीकर्तुं वर्तते।

# भारतीय रिज़र्व-बैङ्क इत्यनेन हिन्दुजा-हाउसिङ्ग-फाइनेन्स सहैव यस बैङ्क इत्यनयोः उपरि मौद्रिक दण्डः आरोपितः




हिमसंस्कृतवार्ता। भारतीय रिज़र्व-बैङ्क इत्यनेन नियामक-निर्देशानां तथा च KYC- मानकानाम् उल्लङ्घनमुद्दिश्य हिन्दुजा-हाउसिङ्ग-फाइनेन्स सहैव यस बैङ्क इत्यनयोः उपरि मौद्रिक दण्डः आरोपितः। पृथक् पृथक् वक्तव्येषु भारतीय रिज़र्व बैङ्केन सूचितं यत्, तेन हिन्दुजा-हाउसिङ्ग-फाइनेन्स इत्यस्योपरि एक-दशमलव-अष्ट-शून्यलक्षरूप्यकाणां दण्डः स्थापितः। अपरत्र यस-बैङ्क इत्यस्योपरि एकत्रिंशद्दशांश-अशीति-लक्षरूप्यकाणां दण्डः आरोपितः।

## केरलम राज्यस्य विविध-जनपदेषु विद्युत्पातेन प्रचण्ड-वायुना च सह अतिवृष्टेः पूर्वानुमानम्

भारत-ऋतु-विज्ञान-विभागेन आगामि-पञ्च-दिवसेषु केरलम राज्यस्य विविध-जनपदेषु विद्युत्पातेन प्रचण्ड-वायुना च सह अतिवृष्टेः पूर्वानुमानं प्रकटितम्। विभागेन गतदिने राज्यस्य नवजनपदेषु पीतवर्णीया सञ्चेतना प्रसारिता। अद्य अपि सञ्चेतना तावत् सप्तजनपदेषु यथावस्थं कार्यान्विता भविष्यति। प्रतिकूल वातावरणस्य कारणात् मत्स्याजीविभ्यः अद्य केरल-लक्षद्वीप-तटेषु गमनपरिहारार्थं परामर्शः प्रदत्तः। यद्यपि कर्नाटक-तटेषु मत्स्य ग्रहणार्थं तादृशः कश्चन प्रतिबन्धः नास्ति।

# मुख्यमन्त्रिणा सुक्खु-महोदयेन 'मेघविस्फोट' घटनानां पुनरावृत्तेः वैज्ञानिक-अध्ययनाय निर्देशाः दत्ताः

हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना हिमाचलप्रदेश-विश्वविद्यालय- शिमलायाः 'हिमालयन सेण्टर फॉर डिजास्टर रिस्क रिडक्शन एण्ड रेजिलिएन्स' इत्यस्य पक्षतः सञ्चालितस्य आपदा- संकट- न्यूनीकरणस्य, कार्ययोजनायाः, अनुसन्धान-आरम्भस्य च समीक्षां कर्तुं एकस्य उच्चस्तरीय- उपवेशनस्य अध्यक्षता कृता। मुख्यमन्त्रिणा राज्ये मेघविस्फोट-घटनानां पुनरावृत्तेः विषये 'एचपीयू' केन्द्राय विस्तृत-वैज्ञानिक- अध्ययनं कर्तुं निर्देशाः दत्ताः। अस्मिन् अध्ययने बन्धानां प्रभावः, तापमाने परिवर्तनम्, भौगोलिक-परिस्थितयः तथा हिमालयीय-क्षेत्रे वारं वारं भवतीनां मेघविस्फोट-घटनानां 'एरियल- डिस्टेंस आधारितविश्लेषणस्य आकलनं सम्मिलितं भविष्यति। तेन एतत् अपि निर्दिष्टं यत् आपदः विस्तृत- अध्ययनं, सङ्कट- आकलनं, तकनीकी- मूल्याङ्कनं च सम्बद्धाः सर्वाः राज्यस्तरीय- अनुसन्धान- विकास- गतिविधयः अनेनैव केन्द्रेण सञ्चालिताः भविष्यन्ति।

## मेघविस्फोटेन मानवजीवनस्य सम्पत्तेः च महती हानिः -मुख्यमन्त्री

मुख्यमन्त्रिणा उक्तं यत् राज्ये मेघविस्फोट-घटनाः निरन्तराः जायमानाः सन्ति, येन मानवजीवनेन सह सम्पत्तेः अपि महती हानिः भवति। अतः हिमाचलप्रदेशे जायमानानाम् एतासां घटनानां स्वरूपस्य वैज्ञानिकाध्ययनं अत्यन्तम् आवश्यकम् अस्ति। सुक्खु-महोदयेन 'हिमाचलप्रदेश- राज्य-आपदा- प्रबन्धन- प्राधिकरणाय' (HPSDMA) केन्द्रस्य क्षमता-निर्माणाय सुदृढीकरणाय च विशेष-प्रशिक्षण- कार्यक्रमेभ्यः षट्कोटि (६ कोटि) रूप्यकाणि आबण्टयितुं निर्देशाः दत्ताः। तेन संस्थागत-सुदृढीकरणाय क्षमता-विस्ताराय च अतिरिक्तं दशकोटि (१० कोटि) रूप्यकाणि अपि स्वीकृतानि। एतदतिरिच्य 'ग्लेशियर- सरोवर-विस्फोट' (GLOF) इत्यस्य वैज्ञानिक-अध्ययनाय एककोटिः रूप्यकाणि आबण्टितानि। केन्द्रं अधिकं सुदृढं कर्तुं तेन अतिरिक्त-विशेषज्ञानां निपुण- जनानां च नियुक्तये अपि बलम् दत्तम्।

## एचपीयू-केन्द्रस्य योगदानस्य प्रशंसा

मुख्यमन्त्रिणा आपदा-प्रबन्धन-क्षेत्रे 'एचपीयू' केन्द्रस्य योगदानस्य प्रशंसां कुर्वता उक्तं यत् ईदृशं वैज्ञानिक-अनुसन्धानं हिमाचलस्य अन्येषु संवेदनशील-क्षेत्रेषु अपि विस्तारितं करणीयम्। राजस्वमन्त्री जगतसिंहनेगी अवदत् यत् भूस्खलन- हिमनदी- जन्य- प्लाव सम्बद्ध-अध्ययनेभ्यः बाह्य- संस्थानाम् उपरि निर्भरता न्यूनीकरणीया, राज्यस्य च वैज्ञानिक-क्षमता वर्धनीया।

### उपवेशने 'हाइड्रोडायनामिक-मॉडल' इत्यस्य प्रस्तुतिः दत्ता

उपवेशन-काले मण्डी-मण्डलस्य थुनाग-क्षेत्रस्य कृते केन्द्रेण विकसितस्य 'हाइड्रोडायनामिक- मॉडल' इत्यस्य प्रस्तुतिः दत्ता। अस्मिन् आकस्मिक-जलप्लावः ('फ्लैश-फ्लड') इत्यस्य प्रभावाणां वैज्ञानिक-आकलनं, पूर्व- सूचना- तन्त्रस्य विकासः च प्रदर्शितः। अस्मिन् अवसरे 'एचपीटीडीसी' (HPTDC) अध्यक्षः रघुबीरसिंहबाली, हिमाचल- विश्वविद्यालयस्य कुलपतिः प्रो. महावीरसिंहः, निदेशकः प्रो. एनएस नेगी तथा अन्ये वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

# H P Tourism: उष्णतायाः शमनार्थं सप्ताहान्ते पर्वतेषु समागताः पर्यटकाः, शिमला अभवत् पूर्णम्, कल्पा मध्ये अपि समागमः

हिमसंस्कृतवार्ताः- शिमला।समतलप्रदेशेषु वर्धमानात् उष्णतायाः शमनार्थं पर्यटकाः हिमाचल प्रदेश राज्यस्य उच्चप्रदेशान् प्रति गन्तुम् आरब्धवन्तः। शनिवासरे सप्ताहान्ते कल्पा नाम प्रमुखे पर्यटनस्थले पर्यटकानां महान् समागमः अभवत्। प्राकृतिकसौन्दर्यस्य मनोहरदृश्यानां शान्तवातावरणस्य च आनन्दं प्राप्नुवन्तः बहवः पर्यटकाः किन्नौर जनपदं प्राप्तवन्तः। पर्यटकानां मध्ये ऐतिहासिकं कल्पा ग्रामं विशेषरूपेण लोकप्रियं जातम्। पर्यटकाः तत्र गत्वा प्राकृतिकसौन्दर्यस्य पूर्णतया आस्वादनं कुर्वन्ति। सप्ताहान्ते शिमलानगरे समागताः बहवः पर्यटकाः, सर्कुलर-मार्गे जातः यातायात-अवरोधः हिमाचल प्रदेश राज्यस्य राजधानी शिमला नगरे अपि सप्ताहान्ते बहुसंख्यकाः पर्यटकाः आगतवन्तः। पर्यटकानाम् आगमने वृद्धे सति नगरे वाहनानां गतिः मन्दीभूता। नगरस्य अनेकाः वाहन-स्थापन-स्थलानि पूर्णानि अभवन्। अस्य कारणेन नगरस्य सर्कुलर-मार्गे यातायात-जामः अभवत्। रिज-प्राङ्गणे सहसा एका अश्वा प्रचकितवती, येन सर्वत्र कोलाहलः अभवत्। शिमलानगरस्य द रिज प्राङ्गणे शनिवासरे एका अश्वी बिदकिता भूत्वा इतस्ततः धावितवती। तेन रिज-प्राङ्गणे भयस्य वातावरणम् उत्पन्नम्। तत्र विद्यमानाः बहवः पर्यटकाः स्थानीयजनाश्च अश्व्याः रक्षणार्थं धावमानाः दृष्टाः। रिज-प्राङ्गणे पूर्वमपि एतादृशाः घटनाः अभवन्।

# मातुःमहिमा(दिवसविशेषः)

डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी, भागलपुर, बिहार

भारतीयसंस्कृतौ मातुः स्थानं परमपूज्यम् अस्ति। अस्माकं शास्त्रेषु, वेदेषु, पुराणेषु, रामायणे, महाभारते च मातुः गौरवस्य विस्तीर्णं वर्णनं प्राप्तम्। "मातृदेवो भव" इति श्रुतिवचनम् अस्मान् शिक्षयति यत् माता देवतावत् पूजनीया अस्ति। माता केवलं जन्मदात्री न भवति, सा जीवनस्य प्रथमगुरुः, संस्कारप्रदात्री, स्नेहस्य सागरः, त्यागस्य प्रतिमूर्तिः, करुणायाः आधारश्च अस्ति।

मानवजीवनस्य आदौ शिशुः मातुः अङ्के एव पालनं प्राप्नोति। सा एव बालकस्य प्रथमः विद्यालयः भवति। मातुः वचनानि, व्यवहारः, संस्काराः, आचारः च बालकस्य व्यक्तित्वनिर्माणे महत्त्वपूर्णां भूमिकां निर्वहन्ति। अतः भारतीयपरम्परायां मातुः महिमा अद्वितीया मन्यते।

## मातुः शब्दस्य अर्थः

"माता" इति शब्दः संस्कृतभाषायां अत्यन्तं मधुरः, पवित्रः, भावपूर्णश्च अस्ति। या स्वस्नेहेन, वात्सल्येन, त्यागेन च सन्तानस्य पालनं करोति सा माता इति कथ्यते। "मा" धातोः रक्षणार्थकत्वात् माता रक्षिका अपि भवति। माता सन्तानं केवलं शरीरेण न धारयति, अपितु हृदयेन अपि पालयति।

वेदेषु मातुः गौरवस्य अनेकानि उदाहरणानि दृश्यन्ते। तैत्तिरीयोपनिषदि स्पष्टतया उक्तम्—

"मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव।"

अस्य अर्थः अस्ति यत् माता देवतासमा माननीया अस्ति। भारतीयसंस्कृतौ देवपूजायाः पूर्वं मातृपूजायाः परम्परा दृश्यते। ऋग्वेदे अपि मातृभूमेः स्तुतिः दृश्यते—"माता भूमिः पुत्रोऽहं पृथिव्याः।"अत्र भूमिः अपि माता इति उच्यते। यतः माता सर्वेषां पालनं करोति।

मातुः वात्सल्यं संसारस्य सर्वाधिकं पवित्रं वस्तु अस्ति। माता स्वसन्तानस्य कृते सर्वं त्यक्तुं सिद्धा भवति। सा स्वस्य सुखं दुःखं वा न चिन्तयति, केवलं सन्तानस्य कल्याणमेव इच्छति।

बालकः रोगग्रस्तः भवति चेत् माता रात्रौ निद्राम् अपि त्यजति । सा स्वहस्तेन औषधं ददाति, प्रेम्णा सान्त्वयति, देवतां प्रार्थयति च। मातुः हृदये केवलं करुणा एव वसति।उक्तम् अस्ति—"कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।"

अर्थात् दुष्टः पुत्रः भवेत्, किन्तु दुष्टा माता कदापि न भवति।

## माता प्रथमगुरुः

बालकस्य जीवने माता एव प्रथमः गुरुः भवति। बालकः प्रथमां भाषां मातुः मुखात् अधिगच्छति। आचार-विचारौ, धर्मः, सदाचारः, विनयः, सेवा, दया, करुणा इत्यादयः गुणाः मातुः शिक्षया एव आगच्छन्ति। छत्रपति-शिवाजीमहाराजस्य जीवने मातुः जीजाबाई इत्यस्याःयोगदानं सर्वविदितम् अस्ति । सा स्वपुत्रं राष्ट्रभक्तं, वीरं, धर्मरक्षकं च अकरोत्। यदि माता श्रेष्ठसंस्कारान् ददाति तर्हि बालकाः राष्ट्रस्य निर्माणे समर्थाः भवन्ति।रामायणे अपि कौशल्या, कैकेयी, सुमित्रा इत्येतासां मातॄणां चरित्राणि उल्लेखनीयानि सन्ति। विशेषतः माता कौशल्या श्रीरामं धर्मनिष्ठं, मर्यादापुरुषोत्तमं च अकरोत्। माता त्यागस्य मूर्तिरूपा अस्ति। गर्भधारणात् आरभ्य सा अनन्तानि कष्टानि सोढ्वा अपि सन्तानरक्षां करोति। नवमासपर्यन्तं गर्भं धारयित्वा असह्यवेदनां सहते, किन्तु प्रसवकाले अपि सा प्रसन्ना भवति यतः तस्याः सन्तानं जन्म अलभत । माता स्वस्य इच्छां परित्यज्य पुत्रस्य पालनपोषणं करोति। निर्धना माता अपि स्वसन्तानं शिक्षयितुं बहूनि कष्टानि सहते। सा स्वयम् उपवासं करोति किन्तु पुत्राय भोजनं ददाति। अतः मातुः ऋणं कदापि न प्रत्यर्पणं भवति।

## भारतीयसंस्कृतौ मातृपूजनम्

भारतीयसंस्कृतिः मातृपूजनप्रधानसंस्कृतिः अस्ति। अस्माकं देशे न केवलं जननी पूज्यते, अपितु गौमाता, गङ्गामाता, भूमाता, वेदमाता इत्यादीनामपि पूजनं क्रियते। नवरात्रोत्सवे आदिशक्तेः दुर्गायाः पूजनं मातृशक्तेः आराधना अस्ति। भारतीयदर्शनानुसारं समस्तं जगत् मातृशक्त्या एव सञ्चालितम् अस्ति।

भारतीयेतिहासे अनेकाः महानार्यः मातृत्वस्य आदर्शं प्रस्तुतवत्यः। माता जीजाबाई, पन्नाधाय, मदालसा, कुन्ती, गांधारी, यशोदा, देवकी इत्यादयः मातरः आदर्शरूपेण स्मर्यन्ते।

## माता जीजाबाई

जीजाबाई शिवाजीमहाराजस्य माता आसीत्। सा बाल्यकालात् एव शिवाजीं धर्मरक्षणस्य, राष्ट्रसेवायाः, स्वाभिमानस्य च शिक्षां दत्तवती। तस्याः प्रेरणया एव शिवाजी महान् शासकः अभवत्।

## माता पन्नाधाय

पन्नाधाय स्वपुत्रस्य बलिदानं दत्त्वा उदयसिंहस्य प्राणान् रक्षितवती। एषा मातृभक्तेः, त्यागस्य च अद्भुतं उदाहरणम् अस्ति।

## माता यशोदा

यशोदा श्रीकृष्णस्य पालनकर्त्री आसीत्। तस्याः वात्सल्यं सम्पूर्णे भागवते प्रसिद्धम् अस्ति।

आधुनिकसमाजे मातुः भूमिका

आधुनिककाले अपि मातुः महत्त्वं न्यूनं न जातम्। अद्यत्वे महिलाः शिक्षाक्षेत्रे, विज्ञानक्षेत्रे, प्रशासनक्षेत्रे, राजनीतिक्षेत्रे च कार्यं कुर्वन्ति, तथापि मातृत्वधर्मं सम्यक् निर्वहन्ति।

कार्यव्यस्ततायामपि माता स्वसन्तानस्य पालनं, शिक्षणं, संस्कारप्रदानं च करोति। आधुनिकमाता परिवारस्य मेरुदण्डः अस्ति।

"मातृभाषा" तथा "मातृभूमिः" इत्येतौ शब्दौ अपि मातृभावस्य विस्तारौ स्तः। यथा माता बालकस्य पालनं करोति तथा मातृभूमिः नागरिकान् पालयति। मातृभाषा मनुष्यस्य संस्कारस्य मूलं भवति।अतः मातृभूमेः रक्षणं, मातृभाषायाः संरक्षणं च प्रत्येकस्य कर्तव्यं भवति।

शास्त्रेषु मातृस्थानम् वर्णितं वर्तते।

मनुस्मृतौ उक्तम्—

"उपाध्यायान्दशाचार्य आचार्याणां शतं पिता। सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते॥"

अर्थात् दश उपाध्यायानां तुल्यः एकः आचार्यः, शताचार्याणां तुल्यः पिता, सहस्रपितॄणां तुल्या माता भवति। अनेन स्पष्टं भवति यत् माता सर्वोच्चं स्थानं धारयति। महाभारते अपि मातुः गौरवं प्रतिपादितम्। रामायणे अपि श्रीरामेण उक्तमस्ति -

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥"

## मातृसेवायाः आवश्यकता

यः पुत्रः मातुः सेवा करोति, स एव पुण्यवान् भवति। वृद्धावस्थायां मातरं परित्यज्य केवलं स्वार्थं चिन्तयन्तः जनाः समाजस्य कृते कलङ्काः सन्ति। अद्यत्वे कतिपये जनाः स्वमातरं वृद्धाश्रमेषु स्थापयन्ति। एषा भारतीयसंस्कृतेः विरुद्धा प्रवृत्तिः अस्ति। अस्माभिः मातुः सम्मानं, सेवा, संरक्षणं च कर्तव्यम्। मातुः प्रेम निष्कामं भवति। संसारस्य अन्यानि सम्बन्धानि स्वार्थाधारितानि भवितुं शक्नुवन्ति, किन्तु मातृप्रेम केवलं स्वार्थरहितं भवति। माता पुत्रस्य दोषान् अपि क्षमते। पुत्रः कियत् अपि दूरं गच्छतु, माता तं सदा स्मरति। तस्याः हृदयं सन्तानस्य कृते सदैव स्पन्दनं करोति।





## राष्ट्रनिर्माणे मातुः योगदानम्

उत्तमाः मातरः एव उत्तमान् नागरिकान् निर्मान्ति। यदि बालकाः श्रेष्ठसंस्कारान् प्राप्नुवन्ति तर्हि राष्ट्रं सुदृढं भवति। अतः राष्ट्रनिर्माणस्य मूलाधारः माता एव अस्ति। स्वामीविवेकानन्दः अपि उक्तवान् यत् राष्ट्रस्य उन्नतिः महिलाशिक्षायाः उपरि आधारिता विद्यते। शिक्षिता माता सम्पूर्णपरिवारं शिक्षयति।

माता करुणामयी भवति। सा सर्वदा क्षमाशीलिनी भवति । पुत्रः अपराधं करोति चेत् अपि माता तं शिक्षयितुं प्रयतते, न तु त्यजति। ईश्वरस्य करुणायाः अनुभवः मातृहृदये एव दृश्यते। अतः अनेके कवयः मातरं देवतारूपेण वर्णितवन्तः।

संस्कृतसाहित्ये मातुः गौरवं विस्तरेण वर्णितं वर्तते। कविकुलगुरुकालिदासः, महाकविभवभूतिः, महाकविबाणभट्टः इत्यादयः कवयः मातुः महत्त्वं प्रतिपादितवन्तः।

हिन्दीसाहित्ये अपि कविमैथिलीशरणगुप्तः, महादेवीवर्मा, राष्ट्रकविरामधारीसिंहदिनकरः इत्यादयः कवयः मातृमहिमानं गीतवन्तः। अतः

निष्कर्षरूपेण वयं वक्तुं शक्नुमो यत् माता मानवजीवनस्य अमूल्यं रत्नम् अस्ति। सा प्रेम्णः, त्यागस्य, करुणायाः, सहिष्णुतायाः च मूर्तिरूपा अस्ति। अतः अस्माभिः सदैव मातुः सम्मानं कर्तव्यम्। यस्य जीवने मातुः आशीर्वादः अस्ति तस्य जीवनं सफलं भवति। माता एव जीवनस्य प्रकाशः, संस्कारस्य आधारः, सुखस्य स्रोतश्च अस्ति। अतः सर्वैः जनैः मातुः सेवा, सम्मानं, संरक्षणं च कर्तव्यम्। एतदेव भारतीयसंस्कृतेः संदेशः अस्ति।अन्ते वयं प्रार्थयामः—"या देवी सर्वभूतेषु मातृरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥"अस्मिन् अवसरे वयं सर्वाभ्यः मातृभ्यः कृते प्रणामांजलिं समर्पयामः।इत्यलम्।

# संस्कृतभाषायाः संरक्षणाय आधुनिकतन्त्रेण सह संयोजनम् आवश्यकम् - डॉ. आनन्ददीक्षितः




**हिमसंस्कृतवार्ताः- लखनऊ**
उत्तरप्रदेश- संस्कृत- संस्थानम्, लखनऊ, विश्वेश्वरदयाल- माध्यमिक- विद्यालयः, लखनऊ इत्येतयोः संयुक्ततत्त्वावधानेन ‘संस्कृतभाषायाः आधुनिकप्रासंगिकता तथा संरक्षणम्’ इत्येतं विषयमधिकृत्य भव्यतया व्याख्यानगोष्ठी मदरलैण्ड-विद्यालयः, सर्वोदयनगर, लखनऊ इत्यस्य सभागारे समायोजिता। अस्मिन्नवसरे संस्कृतभाषायाः प्राचीनवैभवम् आधुनिकसन्दर्भेण संयोजनीयमिति विशेषतया प्रतिपादितम्। कार्यक्रमे बहवः विद्वांसः, आचार्याः, छात्राः, संस्कृतप्रेमिणश्च उपस्थिताः आसन्। मुख्यातिथिरूपेण उपस्थितः ए. के. टी. यू. लखनऊ इत्यस्य वास्तुविषयविशेषज्ञः डॉ. आनन्ददीक्षितः प्रेरणादायकम् उद्बोधनं प्रास्तौत्। सः उक्तवान् यत् “संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। अस्यामेव समस्तानां विज्ञानानां मूलतत्त्वानि निहितानि सन्ति। आधुनिकतन्त्रेण सह संस्कृतभाषायाः संयोजनं, तस्याः अनुप्रयोगाधारितम् अध्ययनमेव संस्कृतं जीवितं करिष्यति एवं नवयुवकानां समीपं नेष्यति।” डॉ. दीक्षितेन संस्कृतस्य कृत्रिमबुद्ध्या (एआई), संगणकतन्त्रेण वैज्ञानिकानुसन्धानैश्च सह सम्बन्धितानि अनेकानि उदाहरणानि प्रस्तुतानि, येन उपस्थिते जनसमूहे विशेषः उत्साहः समुत्पन्नः।विशिष्टवक्तारौ डॉ. आनन्दमिश्रः अथ च डॉ. मोहितशुक्लोऽपि स्वविचारान् प्रस्तुतवन्तौ। डॉ. मिश्रः संस्कृतग्रन्थानां दार्शनिकगाम्भीर्यं प्रकाशितवान्, किञ्च डॉ. शुक्लः भाषासंरक्षणाय सुदृढशैक्षिकनीतीनां आवश्यकताम् अवोचत्। एताभिः चर्चाभिः एतत् स्पष्टम् अभवत् यत् संस्कृतं केवलं संपदारूपा भाषा नास्ति, अपितु भविष्यस्य अपि भाषा अस्ति। कार्यक्रमस्य सञ्चालनं डॉ. अनिलकुमारगौतमेन अत्यन्तं कुशलतया कृतम्। आयोजकैः उक्तं यत् एषा गोष्ठी उत्तरप्रदेशे संस्कृतशिक्षायाः प्रोत्साहने महत्त्वपूर्णं पदम् विधत्ते।अन्ते विश्वेश्वरदयालमाध्यमिकविद्यालयसमितेः सचिवः एच. एन. श्रीवास्तवः सर्वेषाम् अतिथीनां कृते आभारं ज्ञापितवान्। एतत् आयोजनं संस्कृतभाषायाः वैश्विकमहत्त्वं पुनः रेखाङ्कयति तथा युवजनान् अस्याः भाषायाः संरक्षणे संवर्धने च संकल्पबद्धान् करोति। उक्तकार्यक्रमे सुमनलतामिश्रा, वीणाश्रीवास्तवी, डॉ. सीतादेवी, दिनेशकुमारः, श्री सुरेशश्रीवास्तवः इत्यादयः अपि उपस्थिताः आसन्।

# "सुभाषितरसास्वादः"
# "काव्यस्तुतिः"

*"नैव व्याकरणज्ञमेव पितरं, न भ्रातरं तार्किकम्।*
*मीमांसानिपुणं नपुंसकमिति ज्ञात्वा निरस्तादरा।*
*दूरात्संकुचितैव गच्छति पुनश्चण्डालवनच्छान्दसम्।*
*काव्यालङ्कारणज्ञमेव कविताकांता वृणीते स्वयम्।।"*

अर्थः:- काव्यवधूः व्याकरणं पितरं, तार्किकं भ्रातरं मन्यते। सा मीमासकं नपुंसकं मत्वा घृणां च करोति। वैदिकं चाण्डालं ज्ञात्वा सा सङ्कोचमाना पलायते। किन्तु सा स्वयं अग्रे आगत्य काव्यात्मक- वाचकविज्ञानां पुरुषाणां कण्ठे मालां स्थापयति।
गूढार्थः:- काव्यं सदैव वधूरूपेण तिष्ठति किन्तु सा व्याकरणं पितरं मन्यते यत् तस्मात् एव काव्यवधूः जातः। सा तार्किकं भ्रातरं मन्यते यतः सः भ्रातृवत् तर्कैः युद्धं कृत्वा तां निवारयति। मीमांसाविद्वांसः कदापि निष्कर्षं न प्राप्नुवन्ति अतः सा तान् नपुंसकान्, तुच्छान् च मन्यते। सा वैदिकान् चाण्डालान् मन्यते यतः तेषु कोमलतायाः अभावः अस्ति अतः ते तां अवगन्तुं न रक्ष्यन्ति। सा तु कण्ठे मालां स्थापयति यः पुरुषः तस्या वचः सौन्दर्यं शोभयति। काव्यवधूविषये सुभाषितकारेण कियत् सुन्दरं विचारं लिखितम्।

**डा. वर्षा प्रकाश टोणगांवकर ©® पुणे/ महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमो नमः नन्दिनि। अद्य प्रथमं का विचित्रा वार्ता अस्ति?
**नन्दिनी-** पश्य, अमेरिका-देशस्य रक्षा-मन्त्रालयेन बहुदशकानि यावत् सङ्गुप्तानि अन्तरिक्ष- अपरिचित-यानानां पत्राणि अद्य प्रकाशितानि।
**काव्या-** एतेन गगन-रहस्यं प्रकाशितं जातम्, तत् प्रशंसनीयम्। परन्तु भूमौ जीवनं महार्घं सञ्जातम्। एका भारतीययात्रिका अमेरिकादेशे विहर्तुं गतवती अस्ति। तया पञ्चसहस्ररूप्यकाणि एकमुद्रपूपनिमित्तं दत्तानि।
**नन्दिनी-** एषा महार्घता तु चिन्ताकरी। परन्तु ततः अपि महती एका करुणा-वार्ता वर्तते। उत्तर-प्रदेशे एकेन निर्धनेन वृद्धेन पञ्च सारमेयाः स्वस्य त्रिचक्रिकायां रक्षिताः। सः स्व-भोजनं तेभ्यः दत्तवान् अस्ति।
**काव्या-** तस्य वृद्धस्य सेवाभावः मनः स्पृशति। किन्तु अस्माकं तन्त्रज्ञाननगरे विपरीतं दृश्यते। बेङ्गलूरुनगरे महतां तन्त्रज्ञानोद्यानानां समीपे धूलिपूर्णाः मार्गाः केनचित् जनेन चित्रिताः सन्ति। एतेन तत्रत्या असुविधा प्रदर्शिता।
**नन्दिनी-** सत्यम्, तन्त्रज्ञानविकासेन सह मार्गसौकर्यमपि अनिवार्यम्। अद्य एतावदेव। धन्यवादः।



sudha_sathaye@yahoo.com

# ३८ ऊर्जावाहिन्यः, रामरक्षास्तोत्रञ्च

महायोगग्रन्थे शिवसंहितानुसारं मानवशरीरे द्विसप्ततिसहस्राणि नाड्यः सन्ति। तासु मुख्याः अष्टात्रिंशद् वाहिन्यः निरोगशरीरस्य कृते यथाकाले सदैव सक्रियाः भवितुमर्हन्ति। कासुचित् वाहिनीषु रक्तप्रवाहः भवति, अन्यासु च विद्युत्प्रवाहः सञ्चरति। अतः काश्चन वाहिन्यः हृदयरक्तवाहिन्यः भवन्ति, काश्चन तु स्नायुतन्त्रस्य विद्युद्वाहिन्यः भवन्ति। यदा रक्तवाहिनिषु विकारः जायते तदा हृदयाघातः, मस्तिष्काघातः, फुफ्फुसाघातः, वृक्कविफलता च इत्यादयः रोगाः भवन्ति। यदा स्नायुतन्त्रस्य विद्युद्वाहिन्यः विक्षुब्धाः भवन्ति तदा पक्षाघातः, पार्किन्सन-रोगः, ग्रीवावेदना, कटिवेदना, सायटिका इत्यादयः रोगाः उत्पद्यन्ते। एताः अष्टात्रिंशद् वाहिन्यः केवलं शब्दब्रह्मणा सक्रियाः कर्तुं शक्यन्ते। तस्य गूढकुञ्जिका रामरक्षास्तोत्रे इत्यस्य प्रत्येकश्लोके निहिता अस्ति। यदि कश्चित् साधकः विधिपूर्वकं रामरक्षास्तोत्रस्य साधनां करोति, तर्हि सः स्वशरीरे परशरीरे च एताः वाहिन्यः सक्रियाः कर्तुं समर्थो भवति। तथा च महद्भ्यः रोगेभ्यः, जन्ममृत्युरूपात् भवबन्धनात् अपि मोक्षं प्राप्तुं शक्नोति। विनियोगध्यानयोः समये सुषुम्नानाड्याः स्मरणं करणीयम्। ततः प्रत्येकश्लोकपठनात् पूर्वं तस्य श्लोकस्य निर्दिष्टनाड्याः स्मरणं करणीयम्। रामरक्षास्तोत्रे समग्रतया अष्टात्रिंशत् श्लोकाः सन्ति।
.... क्रमशः